# Rudramrityunjaya Stotram

# રુદ્રમૃત્યુઞ્જયસ્તોત્રમ્

## Document Information

Text title : Rudramrityunjaya Stotram

File name : rudramRRityunjayastotram.itx

Category : shiva

Location : doc_shiva

Transliterated by : staff of Muktabodha.org Mark S.G. Dyczkowski

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : rudrayAmale uttaratantre 2 bhairava bhairavI sa.nvAde

Source : Rudrayamalam part 2 edited by Ram Prasad Tripathi and Sudhakar Malaviya

Acknowledge-Permission: Marjorie Woollacott, Ph.D., Digital Library Coordinator muktabodha.org

Latest update : February 16, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 5, 2023

*sanskritdocuments.org*

# રુદ્રમૃત્યુઞ્જયસ્તોત્રમ્

અથાષ્ટચત્ત્વારિંશઃ પટલઃ

આનન્દભૈરવ ઉવાચ ।

શ્રુતં ચ સાધનં પુણ્યં મહારુદ્રસ્ય સુન્દરિ ।
મણિપૂરે પ્રકાશઞ્ચ કથિતં જ્ઞાનનિર્ણયમ્ ॥ ૧॥

અકસ્માત્ સિદ્ધિસમ્પત્તિં નુતિં વદ મહાપ્રિયામ્ ।
યસ્ય શ્રવણમાત્રેણ પાઠેન યોગિનીવશમ્ ॥ ૨॥

શ્રીઆનન્દભૈરવી ઉવાચ ।
પરમાનન્દદેવેશ યોગાનામધિપ પ્રભો ।
સ્તોત્રં રુદ્રસ્ય વક્ષ્યામિ સારાત્સારં પરાત્પરમ્ ॥ ૩॥

યજ્જ્ઞાત્વા યોગિનઃ સર્વે ષટ્ચક્રપરિભેદકાઃ ।
આકાશગામિનઃ સર્વેસ્સ્વર્ગમોક્ષાભિલાષુકાઃ ॥ ૪॥

મહાદેવસમાઃ સર્વે દેવાશ્ચ સ્વર્ગભોગિનઃ ।
સર્વરક્ષાકરં સ્તોત્રં યે પઠન્તિ નિરન્તરમ્ ॥ ૫॥

તે યાન્તિ બ્રહ્મસદનં સિદ્ધમુખ્યા મહીતલે ॥ ૬॥

ૐ ભજામિ શમ્ભું સુખમોક્ષહેતું
    રુદ્રં મહાશક્તિસમાકુલાઙ્ગમ્ ।
રૌદ્રાત્મકં ચારુહિમાંશુશેખરમ્ ।
    કાલં ગણેશં સુમુખાય શઙ્કરમ્ ॥ ૭॥

મૃત્યુઞ્જયં જીવનરક્ષકં પરં
    શિવં પરબ્રહ્મશરીરમઙ્ગલમ્ ।
હિમાંશુકોટિચ્છવિમાદધાનં
    ભજામિ પદ્મદ્વયમધ્યસંસ્થિતમ્ ॥ ૮॥

સર્વાત્મકં કામવિનાશમૂલમ્ ।

તં ચન્દ્રચૂડં મણિપૂરવાસિનમ્ ।
ચતુર્ભુજં જ્ઞાનસમુદ્રયાઢ્યં
પાશં મૃગાક્ષં ગુણસૂત્રવ્યાપ્તમ્ ॥ ૯॥

ધરામયં તેજસમિન્દુકોટિં
વાયું જલેશં ગગનાત્મકં પરમ્ ।
ભજામિ રુદ્રં કુલલાકિનીગતં
સર્વાઙ્ગયોગં જયદં સુરેશ્વરમ્ ॥ ૧૦॥

શુક્રં મહાભીમનયં પુરાણં
પ્રાણાત્મકં વ્યાધિવિનાશમૂલમ્ ।
યજ્ઞાત્મકં કામનિવારણં ગુરું
ભજામિ વિશ્વેશ્વરશઙ્કરં શિવમ્ ॥ ૧૧॥

વેદાગમાનામતિમૂલદેશં
તદુદ્ભવં ભદ્રહિતં પરાપરમ્ ।
કાલાન્તકં બ્રહ્મસનાતનપ્રિયં
ભજામિ શમ્ભું ગગનાદિરૂઢમ્ ॥ ૧૨॥

શિવાગમં શબ્દમયં વિભાકરં
ભાસ્વત્પ્રચણ્ડાનલવિગ્રહં ગ્રહમ્ ।
ગ્રહસ્થિતં જ્ઞાનકરં કરાલં
ભજામિ શમ્ભું પ્રકૃતીશ્વરં હરમ્ ॥ ૧૩॥

છાયાકરં યોગકરં સુખેન્દ્રં
મત્તં મહામત્તકુલોત્સવાઢ્યમ્ ।
યોગેશ્વરં યોગકલાનિધિં વિધિમ્ ।
વિધાનવક્તારમહં ભજામિ ॥ ૧૪॥

હેમાચલાલઙ્કૃતશુદ્ધવેશં
વરાભયાદાનનિદાનમૂલમ્ ।
ભજામિ કાન્તં વનમાલશોભિતં
ચામૂલપદ્મામલમાલિનં કુલમ્ ॥ ૧૫॥

સ્વયં પુરાણં પુરુષેશ્વરં ગુરું
મિથ્યાભયાહ્લાદવિભાવિનં ભજે ।
ભાવપ્રિયં પ્રેમકલાધરં શિવં

ગિરીશ્વરં ચારુપદારવિન્દમ્ ॥ ૧૬॥

ધ્યાનપ્રિયં જ્ઞાનગભીરયોગં
ભાગ્યાસ્પદં ભાગ્યસમં સુલક્ષણમ્ ।
શૂલાયુધં શૂલવિભૂષિતાઙ્ગં
શ્રીશઙ્કરં મોક્ષફલક્રિયં ભજે ॥ ૧૭॥

નમો નમો રુદ્રગણેભ્ય એવં
મૃત્યુઞ્જયેભ્યઃ કુલચઞ્ચલેભ્યઃ ।
શક્તિપ્રિયેભ્યો વિજયાદિભૂતયે
શિવાય ધન્યાય નમો નમસ્તે ॥ ૧૮॥

બાહ્યં ત્રિશૂલં વરસૂક્ષ્મભાવં
વિશાલનેત્રં તનુમધ્યગામિનમ્ ।
મહાવિપદ્ દુઃખવિનાશબીજં
પ્રજ્ઞાદયાકાન્તિકરં ભજામિ ॥ ૧૯॥

પુરાન્તકં પૂર્ણશરીરિણં ગુરું
સ્મરારિમાદ્યં નિજતર્કમાર્ગમ્ ।
અનાદિદેવં દિવિ દોષઘાતિનં
ભજામિ પઞ્ચાક્ષરપુણ્યસાધનમ્ ॥ ૨૦॥

દિગમ્બરં પદ્મમુખં કરસ્થં
સ્થિતિક્રિયાયોગનિયોજનં ભવમ્ ।
ભાવાત્મકં ભદ્રશરીરિણં શિવં
ભજામિ પઞ્ચાનનમર્કવર્ણમ્ ॥ ૨૧॥

માયામયં પઙ્કજદામકોમલં
દિગ્વ્યાપિનં દણ્ડધરં હરેશ્વરમ્ ।
ત્રિપક્ષકં ત્ર્યક્ષરબીજભાવં
ત્રિપદ્મમૂલં ત્રિગુણં ભજામિ ॥ ૨૨॥

વિદ્યાધરં વેદવિધાનકાર્યં
કાયાગતં નીતનિનાદતોષમ્ ।
નિત્યં ચતુર્વર્ગફલાદિમૂલં
વેદાદિસૂત્રં પ્રણમામિ યોગમ્ ॥ ૨૩॥

વેદાન્તવેદ્યં કુલશાસ્ત્રવિજ્ઞં
    ક્રિયામયં યોગસ્વધર્મદાનમ્ ।
ભક્તેશ્વરં ભક્તિપરાયણં વરં
    ભક્તં મહાબુદ્ધિકરં ભજામ્યહમ્ ॥ ૨૪॥

ગતાગતં ગમ્યમગમ્યભાવં
    સમુલ્લસત્કોટિકલાવતંસમ્ ।
ભાવાત્મકં ભાવમયં સુખાસુખં
    ભજામિ ભર્ગં પ્રથમારુણપ્રભમ્ ॥ ૨૫॥

બિન્દુસ્વરૂપં પરિવાદવાદિનં
    મધ્યાહ્નસૂર્યાયુતસન્નિભં નવમ્ ।
વિભૂતિદાનં નિજદાનદાનં
    દાનાત્મકં તં પ્રણમામિ દેવમ્ ॥ ૨૬॥

કુમ્ભાપહં શત્રુનિકુમ્ભઘાતિનં
    દૈત્યારિમીશં કુલકામિનીશમ્ ।
પ્રીત્યાન્વિતં ચિન્ત્યમચિન્ત્યભાવં
    પ્રભાકરાહ્લાદમહં ભજામિ ॥ ૨૭॥

ત્રિમૂર્તિમૂલાય જયાય શમ્ભવે
    હિતાય લોકસ્ય વપુર્ધરાય ।
નમો ભયાચ્છિન્નવિઘાતિને પતે
    નમો નમો વિશ્વશરીરધારિણે ॥ ૨૮॥

તપઃફલાય પ્રકૃતિગ્રહાય
    ગુણાત્મને સિદ્ધિકરાય યોગિને ।
નમઃ પ્રસિદ્ધાય દયાતુરાય
    વાઞ્છાફલોત્સાહવિવર્ધનાય તે ॥ ૨૯॥

શિવમમરમહાન્તં પૂર્ણયોગાશ્રયન્તં
    ધરણિધરકરાબ્જૈર્વર્ધમાનં ત્રિસર્ગમ્ ।
વિષમ મરણઘાતં મૃત્યુપૂજ્યં જનેશં
    વિધિગણપતિસેવ્યં પૂજયે ભાવયામિ ॥ ૩૦॥

એતત્સ્તોત્રં પઠેદ્ વિદ્વાન્ મુનિર્યોગપરાયણઃ ।
નિત્યં જગન્નાથગુરું ભાવયિત્વા પુનઃ પુનઃ ॥ ૩૧॥

મણિપૂરે વાયુનિષ્ઠો નિત્યં સ્તોત્રં પઠેદ્ યદિ ।
જીવન્મુક્તશ્ચ દેહાન્તે પરં નિર્વાણમાપ્નુયાત્ ॥ ૩૨॥

ઇતિ શ્રીરુદ્રયામલે ઉત્તરતન્ત્રે મહાતન્ત્રોદ્દીપને રુદ્રમૃત્યુઞ્જયસ્તવનં
નામ અષ્ટચત્વારિંશત્તમઃ પટલઃ ॥ ૪૮॥

From Rudrayamala uttaratantra.

Proofread by Aruna Narayanan

*Rudramrityunjaya Stotram*

pdf was typeset on April 5, 2023

Please send corrections to *sanskrit@cheerful.com*